काद्दयमिष्यते” । ऊर्द्धमनन्तरम् । वायुपुराणे “त्रयोदश्यस्तगे सूर्य्ये चतसृष्वपि नाड़िषु । भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेत्” । ईशानसंहितायाम् “माघे कृष्णचतुर्द्दश्यामादिदेवो महानिशि । शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः ॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः । अर्द्धरात्रादधश्चोर्द्धं युक्ता यत्र चतुर्द्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नरः” । अत्र “महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः” इति देवलोक्ता महानिशा ग्राह्या । घटिका एकदण्डः । एवञ्च यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्द्दशी तद्दिने व्रतम् उभयव्याप्त्यनुरोधात् । कालमाधवीयोऽप्येवम् । एतेन परदिने उभयव्यापित्वेऽपि पूर्व्वदिवसीयरात्रिद्वितीययामप्रभृतिचतुर्द्दशीसत्त्वे बहुप्रहरव्यापित्वेन पूर्व्वदिन एव व्रतमिति निरस्तम् । यदा तु पूर्व्वेद्युर्निशीथमात्रव्याप्तिः परेद्युः प्रदोषमात्रव्याप्तिस्तदा पूर्व्वेद्युर्व्रतं प्रधानकालव्याप्त्यनुरोधात् । “पूर्व्वेद्युरपरेद्युर्वा महानिशि चतुर्द्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नरः” इतीशानसंहितावचनाच्च । एतद्विषय एव भविष्ये “अर्द्धरात्रात् पुरस्तात्तु जयायोगो भवेद्यदि । पूर्व्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः” । विष्णुधर्म्मोत्तरे “जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते । कृत्वोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम्” । तिथ्यन्तेपारणं जयन्तीमात्रपरं तत्र चतुर्द्दश्यामेव तत् “ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै । पूजितानि भवन्तीह भूतायां पारणे कृते” इति स्कान्दात् । “दिनमानप्रमाणेन या तु रात्रौ चतुर्द्दशी । शिवरात्रिस्तु सा ज्ञेया चतुर्द्दश्यान्तु पारणम्” इति गौतमीयाच्च । यदा तु पूर्व्वदिने न निशीथव्याप्तिः परदिने प्रदोषमात्रव्यापिनी तदा परा ग्राह्या प्रदोषव्यापिनीति प्रागुक्तत्वात् तिथेस्तत्सन्ध्याव्यापित्वाच्च । एतद्विषय एव लिङ्गपुराणम् “शिवरात्रिव्रते भूतां कामविद्धां विवर्ज्जयेत् । एकेनैवोपवासेन ब्रह्महत्यां व्यपोहति” । अमावास्यायामेव पारणम् “शिवाऽघोरा तथा प्रेता सावित्री च चतुर्द्दशी । कुहूयुक्तैव कर्त्तव्या कुह्वामेव हि पारणम्” । इति वचनात् । तदयं संक्षेपः । यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्द्दशी तद्दिने व्रतम् । यदा तु पूर्व्वेद्युर्निशीथव्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वेद्युर्व्रतम् । यदा तु न पूर्व्वेद्युर्निशीथव्याप्तिः परदिने प्रदोषव्यापिनी तदा परदिने । पारणन्तु परदिने चतुर्द्दशीलाभे चतुर्द्दश्यां, तदलाभे अमावास्यायाम्” ति॰ त॰ रघु॰

**शिवलिङ्ग**, न॰ ६ त॰ । शिवस्य लिङ्गाकारे प्रस्तरादिमये पदार्थे तदाविर्भावपूज्यतादिकं यथा —

“तत्रापि गत्वा मदनो ददर्श वृषकेतनम् । दृष्ट्वा गहन्तु कामोऽथ ततः स प्राद्रवद्धरः । ततो दारुवनं घोरं मदनाभिसृतो हरः । विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः । ते चापि ऋषयः सर्व्वे दृष्ट्वा मूर्द्ध्ना नताभवन् । ततस्तान् प्राह भगवान् भिक्षां मे प्रतिदीयताम् । ततस्ते मौनिनस्तस्थुः सर्व्व एव महर्षयः । तदाश्रमाणि पुण्यानि परिचक्राम नारद ! । तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः । प्रक्षोभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः । ऋते त्वरुन्धतीमेकामनसूयाञ्च भाविनीम् । एताभ्यां भर्त्तृपूजासु ततं वै सुस्थिरं मनः । ततः संक्षुभिताः सर्व्वा यत्र याति महेश्वरः । तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः । त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः । अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् । ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने ! । क्रोधान्विताब्रुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि । ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् । अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः । ततः स पतितो लिङ्गो विभिद्य वसुधातलम् । रसातलं विवेशाशु ब्रह्माण्डं चोर्द्धतोऽभिनत् । ततश्चचाल पृथिवी गिरयः सरितो नगाः । पातालभुवनाः सर्व्वे जङ्गमाजङ्गमाः स्थिताः । संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः । जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् । तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः । उवाच देव ! भुवनाः किमर्थं क्षुभिता विभो ! । अथोवाच हरिर्ब्रह्मन् शार्व्वो लिङ्गो महर्षिभिः । पतितस्तस्य भारार्त्ता संचचाल वसुन्धरा । ततस्तदद्भुततमं श्रुत्वा देवः पितामहः । तत्र गच्छामि देवेश एवमाह पुनः पुनः । ततः पितामहो देवः केशवश्च जगत्पतिः । आजगाम तमुद्देशं यत्र लिङ्गं भवस्य तत् । ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् । पातालं प्रविवेशाथ विस्मयात् त्वरितो विभुः । ब्रह्मा पद्मविमानेन ऊर्द्ध्वमाक्रम्य सर्व्वतः । नैवान्तमलभद् ब्रह्मा विस्मितः पुनरागतः । विष्णुर्गत्वाथ पातालं सप्तलोकपरायणः । चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने !” इत्युपक्रमे “हर उवाच